अन्यच्च ।
"न पितुर्व्वचनं कार्य्यं यथा मातुः सुतेन हि ।
पिता च पतितस्त्याज्यो न माता सत्सुतेन हि ।
गर्भधारणपोषाद्धि ततो माता गरीयसी ॥
दशविप्रादुपाध्यायो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशभ्यस्तु माता चैव गरीयसी ।
मातृतोऽन्यो न देवोऽस्ति तस्मात् पूज्या सदा सुतैः ॥
मातुश्च यद्धितं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"
इति वह्निपुराणम् ॥
अपरञ्च ।
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि ।
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
मातृशब्दसम्भाषया मातृतुल्यत्वम् यथा,—
"मातरित्येव शब्देन याञ्च संभाषते नरः ।
सा मातृतुल्या सत्येन धर्म्मः साक्षी सतामपि ॥
तया सहितश्शृङ्गारे कालसूत्रं प्रयाति सः ।
तत्र घोरे वसत्येव यावद्वै ब्रह्मणो वयः ॥
प्रायश्चित्तं पापिनश्च तस्य नैव श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
शिवस्य परिवारविशेषः । स च असुरमारणे ब्रह्मादीनां स्वेदनिर्गतत्वात् अष्टशक्तिदेवतारूपो यथा,—
"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥"
सप्तविधोऽपि यथा,—
"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौवेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"
इत्यमरटीकायां भरतः ॥
गौर्य्यादिषोडशमातृकाः । यथा,—
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
इति श्राद्धतत्त्वे बह्वृचगृह्यपरिशिष्टम् ॥
वैष्णवपूज्या मातृगणा यथा,—.
"यत्र मातृगणाः पूज्यास्तत्र ह्येताः प्रपूजयेत् ।
सदा भागवती पौर्णमासी पद्मान्तरङ्गिका ॥
गङ्गाकलिन्दतनयागोपीवृन्दावतीस्तथा ।
गायत्त्रीतुलसीवाणीपृथिवीगाश्च वैष्णवीः ॥
श्रीयशोदादेवहूतीदेवकीरोहिणीमुखाः ।
श्रीसीता द्रौपदी कुन्ती ह्यपरा या महर्षयः ।
रुक्मिण्याद्यास्तथा चाष्ट महिषीर्याश्च ता अपि ॥"
इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥
सप्त मातरो यथा,—
"आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
गावी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"
इति केचित् पठितम् ॥
मातृतुल्यां यथा ।
"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥
गौः । भूमिः । इति मेदिनी । ते, ४३ ॥ (निरुक्ते च ।८।३ । "यदूर्द्ध्वस्थिता द्रविणेह धत्ताद्यदाशयो मातुरस्या उपस्थे ।" "मातुः अस्याः पृथिव्याः ।" इति तट्टीकायां दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली ॥ लक्ष्मीः । इति हेमचन्द्रः । ३।३२१ । रेवती । इत्यजयपालः ॥ आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटामांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अस्मिन्नर्थे परिमाणार्थमाधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (निर्म्माणकर्त्तरि च । यथा, ऋग्वेदे । १ । ६१ । ७ ।
"अस्येदु मातुः सवनेषु सद्योमहः ।"
"मातुः दृष्टिद्वारेण सकलस्य जगतो निर्मातुः ।"
इति तद्भाष्ये सायनः ॥)

माता, स्त्री, (मान्यते पूज्यते इति । मान पूजायां + तृन् तलष्टापि निपातनात् साधुः ।) जननी । यथा
'विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।'
इति शिवरहस्ये दुर्गास्तवदर्शनात् आवन्तोऽयं शब्दः ॥

मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतोद्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४ । इत्यमरभरतौ । २ । ६ । ३७ ॥ नित्यद्विवचनान्तोऽयम् ॥ (यथा, मनौ । ३ । १५७ ॥
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ॥")

मातामहः, पुं, (मातुः पिता । "पितृव्यमातुलमातामहपितामहाः । ४ । २ । ३६ । इति डामहच् निपातितश्च ।) मातुः पिता । इत्यमरः । २ । ६ । ३३ ॥ दौहित्रस्य मातामहसाधर्म्यं यथा,—
"आसीदङ्गो नृपश्रेष्ठो यशस्वी दृढव्रतः ।
यजतः सुमहत्कालादेष एकोऽभवत्ततः ॥
मृत्योः कन्या सुनीथा या मातुर्दुःशीलकारणात् ।
क्रूरा बुद्धिरभूत्तस्य जगतोऽस्यापि पीड़ने ॥
तपस्विनां कुले जाता ऋषीणाञ्च यशस्विनाम् ।
सगुणां निर्गुणां वापि याति मातामहीं तनुम् ॥"
इत्यग्निपुराणम् ॥
तन्मरणे त्रिरात्राशौचं यथा । मातामहानां मरणे त्रिरात्रं स्यादशौचकम् । इति शुद्धितत्त्वे कूर्म्मपुराणम् ॥ * ॥ दुहितृपर्य्यन्ताभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा,—
"मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे ।
ते च तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा ॥"
इति शुद्धितत्त्वम् ।
दुहितृपर्य्यन्ताभावे तस्य धने दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः ।
"पौत्त्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति मनुवचने पौत्त्रतुल्याभिधानेन यथा पुत्त्राभावे पौत्त्रस्तथा दुहित्रभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्त्रपौत्त्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्त्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥

मातामही, स्त्री, (मातामहस्य पत्नीति ।" पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति + ङीष् ।) मातामहपत्नी । मातृमाता । आइ इति भाषा । यथा,—
"मातामही मातृमाता मातृतुल्या च पूजिता ।
प्रमातामहीति विख्याता प्रमातामहकामिनी ।
वृद्धप्रमातामही ज्ञेया तत्पितुः कामिनी तथा ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तन्मरणे पक्षिण्यशौचं यथा,—
"मातुले श्वशुरे मित्रे गुरौ गुर्व्वङ्गनासु च ।
अशौचं पक्षिणीं रात्रिं मृता मातामही यदि ॥"
इति शुद्धितत्त्वम् ॥
दुहितृपर्य्यन्ताभावे तच्छ्राद्धे दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः । प्रागुक्तब्रह्मपुराणे तथादर्शनात् ।
"पौत्त्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इत्यनेन यथा पुत्त्राभावे पौत्त्रस्तथा दुहित्रभावे दौहित्रः । इति प्रागेवोक्तत्वात् ।
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्म्मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ॥"
इति वृद्धशातातपवचनेन मातामह्याश्च साक्षाद्दौहित्रेण पिण्डदानश्रुतेः धनाधिकारित्वाच्च । इति शुद्धितत्त्वम् ॥ * ॥ तस्या अयौतुकधने पौत्त्रपर्य्यन्ताभावे दौहित्राधिकारः । यौतुकधने तु पुत्त्रपर्य्यन्ताभावे दौहित्राधिकारो यथा ।
"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्त्रवत् ॥"
इति मनुवचने दौहित्रे पौत्त्रधर्म्मातिदेशात् पुत्त्रेण परिणीतदुहितुर्बाधात् बाधकपुत्त्रेण बाध्यदुहितृपुत्त्रबाधस्य न्याय्यत्वात् । इति दायतत्त्वम् ॥ पुत्त्राभावे दौहित्रोऽधिकारी । पुत्त्रा-